International Journal of Sanskrit Research 2023; 9(4): 81-85

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(4): 81-85
© 2023 IJSR
www.anantaajournal.com
Received: 07-06-2023
Accepted: 13-07-2023

**Truptimayee Hota**
Research Scholar,
Department of Sanskrit,
Utkal University, Vani
Vihar, Bhubaneswar,
Odisha, India

**Corresponding Author:**
**Truptimayee Hota**
Research Scholar,
Department of Sanskrit,
Utkal University, Vani
Vihar, Bhubaneswar,
Odisha, India

# कोशलानन्दमहाकाव्ये ओडिशायाः प्रसिद्धघोषयात्रायाः वर्णनम्

## Truptimayee Hota

**DOI:** https://doi.org/10.22271/23947519.2023.v9.i4b.2172

**सारांशः**
उत्सते मानवाः इति उत्सवः'। संसारे समस्तदेशेषूत्सवानां महत्वं वर्त्तते। जगति वहूनि मतानि वहवः सम्प्रदायाश्च प्रचलन्ति। तेषु सर्वेषु मतेषु संप्रदायेषु च उत्सवाः परिपाल्यन्ते। उच्यतेऽपि 'उत्सवप्रियाः खलु मनुष्याः'। अर्थात् मानवाः उत्सवप्रियाः भवन्ति। उत्सवपरिपालने भारतं सर्वप्रथमम्। भारते यावन्ति पर्वाणि सन्ति तावन्ति नान्यत्र कुत्रापि परिपाल्यन्ते। अत्र अनेके प्रदेशाः विविधसंस्कृतयश्च सन्ति। ते स्वतन्त्ररूपेण पर्वाणि परिपालयन्ति। अनेन क्रमेण ओडिशा भारतस्य एकः महत्वपूर्णप्रदेशो विद्यते। प्रदेशोऽयं सुसंस्कृतिसम्पन्नः। अत्र द्वादशमासेषु त्रयोदशोत्सवाः मुख्यरूपेण परिपाल्यन्ते। येषु सामाजिक-धार्मिक-ऐतिहासिकाश्च सन्ति। एतेषामुत्सवानां महत्वं परिज्ञाय तत्रत्याः साहित्यकाराः कवयः लेखकाश्च स्वरचनायां वर्णनं चक्रुः। अनेन क्रमेण गङ्गाधरमिश्रविरचितं कोशलानन्दमहाकाव्यमेकं महाकाव्यं विद्यते। यस्मिन् काव्ये ओडिशायाः प्रसिद्धरथयात्रायाः वर्णनमातिचारूतया वर्त्तते। अत्र मम शोधवाचनपत्रस्य विषयः अयमेव वर्त्तते।

**कूटशब्दः** उत्सवः, चौहाणराजवंशः, रथयात्रा, कल्मषः, जगन्नाथः

## प्रस्तावना
मानवजीवनं वैविध्येन परिपूर्णम्। मानवाः स्वजीवने अनेककर्माणि निर्वहन्ति। तेषु ते एतावत् निमज्जन्ति येन स्वकर्माणि एव पश्यन्ति। अन्येषां कृते तेषां पार्श्वे समयो न भवति। यस्मात् कारणात् ते विक्षिप्ताः भूत्वा स्वहानीं अन्येषां च क्षतिं कुर्वन्ति।अस्यां परिस्थितौ ते कश्चन सुखकरम् अवसरम् अन्वेषयन्ति। मानवः सामाजिकप्राणी विद्यते। अतः सः समाजं परिलक्ष्य सामाजिककार्याणि च कुर्वन् तत् सुखदावसरम् अन्वेषयति। अस्मिन् अवसरे सः सर्वै साकं सम्मिल्य सामाजिकमूल्यवोधानि च परिपालयन् आत्मानन्दं प्राप्नोति। अवसरोऽयं लघुः विराटश्च भवितुं शक्यते। मनुष्यः यदा लघुरूपेण व्यक्तिगतरूपेण वा एतदानन्दम् अनुभवति। तत् विशिष्टावसररूपेण गण्यते। परं यदा प्रत्येकजातिवर्गस्थाः मानवाः सम्मिल्य समूहरूपेण विराटरूपेण च तस्य सुखकरावसरस्य आनन्दम् आप्नुवन्ति। सः अवसरः उत्सवः पर्व इत्यप्युच्यते। उत्सवाः अस्माकं जीवने परिवर्त्तनं हर्षोलासं मैत्रीभावं नवीनतां च आनयन्ति।

उत्सवाः सामाजिक-परम्परा-संस्कारान् च आहृत्य भवन्ति। येन अस्माकं जीवने उत्सवानां महत्वम् अधिकं भवति।
पर्वाणि पारिवारिक-सामाजिक-राष्ट्रीय-एकतासु महत्वपूर्णयोगदानम् आवहन्ति। उत्सवेषु जनाः स्वमानमपमानं विस्मृत्य परस्परं प्रति सौहार्दभावं स्थापयन्तः एकत्रिभूत्वा पर्वणः शोभां संवर्धयन्ति। पर्वाणि एव जनानां मनसः वैरभावं निष्काष्य सांगठनिकभावं जनयन्ति। उत्सवाः सामाजिक-सांस्कृतिक-राष्ट्रीयतानां प्रतीकाः भवन्ति। ये सर्वप्राणिषु जागृतिं समुत्पादयन्ति। अतः एते एव राष्ट्रीयएकतायाः कारणानि भवन्ति।
'उत्सते मानवाः इति उत्सवः'। संसारे समस्तदेशेषूत्सवानां महत्वं वर्त्तते। जगति वहूनि मतानि वहवः सम्प्रदायाश्च प्रचलन्ति। तेषु सर्वेषु मतेषु संप्रदायेषु च उत्सवाः परिपाल्यन्ते। उच्यतेऽपि 'उत्सवप्रियाः खलु मनुष्याः'। अर्थात् मानवाः उत्सवप्रियाः भवन्ति। उत्सवपरिपालने भारतं सर्वप्रथमम्। भारते यावन्ति पर्वाणि सन्ति तावन्ति नान्यत्र कुत्रापि परिपाल्यन्ते। अत्र अनेके प्रदेशाः विविधसंस्कृतयश्च सन्ति। ते स्वतन्त्ररूपेण पर्वाणि परिपालयन्ति। अनेन क्रमेण ओडिशा भारतस्य एकः महत्वपूर्णप्रदेशो विद्यते। प्रदेशोऽयं सुसंस्कृतिसम्पन्नः। अत्र द्वादशमासेषु त्रयोदशोत्सवाः मुख्यरूपेण परिपाल्यन्ते। येषु सामाजिक-धार्मिक-ऐतिहासिकाश्च सन्ति। एतेषामुत्सवानां महत्वं परिज्ञाय तत्रत्याः साहित्यकाराः कवयः लेखकाश्च स्वरचनायां वर्णनं चक्रुः। अनेन क्रमेण गङ्गाधरमिश्रविरचितं कोशलानन्दकाव्यमेकं महाकाव्यं विद्यते। यस्मिन् काव्ये ओडिशायाः प्रसिद्धरथयात्रायाः वर्णनमतिचारूतया वर्त्तते। संस्कृतसाहित्ये अनेककाव्यमहाकाव्यानि सन्ति। तेषु को शलानन्दमहाकाव्यमन्यतमम्। काव्यमिदं
प्राचीनकोशलस्य (आधुनिकपश्चिमोत्कलस्य) एकं प्रसिद्धं महाकाव्यं वर्त्तते। महाकाव्येऽस्मिन् कोशलराज्यस्य गौरवपूर्णोतिहासः वर्णितोऽस्ति। अतः काव्यमिदम् ऐतिहासिकमहाकाव्यमिति परिगण्यते। कोशलानन्दमहाकाव्यस्य प्रणेताऽस्ति प. गङ्गाधरमिश्रः। सः शम्भुकवंशोत्पन्नः उत्कलीयब्राह्मणो आसीत्। तस्य पितुः नाम गोपीनाथः आसीत्।

जातः शम्भूकरभिधः कविवरो विद्याकरस्तत्सुतः।।
गोपीनाथ क एष पण्डितवरो हीराङ्कुरो वर्त्तते।
जातं यन्म ममेति तत्र सहसा नैषो विधत्ते मुदम्।।[1]

स सम्वलपुरराज्यस्य राज्ञः वलियारसिंहस्य सभापण्डितो आसीत्। अतः तेन काव्यमिदं 1664 ख्रीष्टाब्दे वलीयारसिंहदेवस्य वंशपरम्परामवलम्व्य विरचितम्। यतः वलियारसिंहदेवस्य समयः 1664 ख्रीष्टाब्देः इति ज्ञायते।

काले याति कलौ कलाचलयुगे प्रतर्थिदन्तावल
व्यूहे श्रीवलियारसिंह इति यो लक्षार्थिरक्षाप्रदः।।[2]

अस्मिन् काव्ये एकविंशतिसर्गाः सन्ति। द्वाविंशतितमः सर्गः अतिरिक्तसर्गरूपेण परिगण्यते। अस्य अतिरिक्तसर्गस्य रचनाकारः गङ्गाधरगुरूः आसीत्। अपरत्र प्रकाशितपुस्तके सर्गाणां संख्या 23 वर्त्तते। परं तत्र गङ्गाधरगुरोः अतिरिक्तसर्गो न प्राप्यते। काव्ये अतिरिक्तसर्गस्य श्लोकान् सम्मिल्य 1153 श्लोकाः सन्ति। अस्य ग्रन्थस्य प्रमुखविषयोऽस्ति कोशलराज्यस्य चौहाणराजवंशपरम्परा। अस्य काव्यस्योपरि पाण्डुलिपित्रयं प्राप्यते।

1. सुवर्णपुरराज्यस्य पण्डितरामचन्द्रशतपथीमहोदयेन 1888 ख्रीष्टाब्दे संपादितकाव्यम्।
2. पण्डितवाउरिवन्धुनन्दमहोदयेन 1938 ख्रीष्टाब्दे संपादितकाव्यम्।
3. अध्यापिकलिङ्गराजमिश्रेण आंगलभाषायां संपादितकाव्यम्।

कोशलानन्दमहाकाव्यविषये ज्ञातुम् इदं काव्यमेव प्रमुखोपादानमस्ति।
रथयात्रा ओडिशायाः प्रसिद्धपर्व विद्यते। न केवलम् ओडिशायाः अपितु विश्वप्रसिद्धपर्व विद्यते। अस्मिन् अवसरे अखिलभूमण्डलस्य जनाः समागत्य भगवतः दर्शनं विधाय कल्मषरहितो भूत्वा मोक्षमार्गानुगामीनो भवन्ति। रथयात्रायां त्रिमुर्त्तयः भक्तमनप्रसन्नाय मन्दिरात् वर्हि आगत्य भक्तान् दर्शनं यच्छन्ति। रथयात्रा आषाढमासस्य शुक्लपक्षस्य द्वितीयायां तिथौ प्रतिवर्षे भवति। अस्यां यात्रायां जगन्नाथ- वलभद्र- शुभद्राणां त्रयरथाः निर्मियन्ते। रथाः श्रीमन्दिरात् प्रारभ्य गुण्डिचामन्दिरं यावत् गच्छन्ति। रथयात्रा ओडिशायाः हर्षोल्लासस्य उत्सवः विद्यते।
अस्याः रथयात्रायाः वर्णनं कविना कोशलानन्दमहाकाव्ये सम्यग् रूपेण कृतम्। अस्य काव्यस्य एकादशसर्गे रथयात्रायाः सुचारू वर्णनं विद्यते। कविः रथयात्रायाः वर्णनं कुर्वन् लिखति यत्-

पूतः क्ष्मावासिराशिस्तव धव जयति स्यन्दने नन्दिघोषे
सानन्दं नन्दनेशः सममरगणैर्भाग्यभाञ्जीक्षणानि।
संस्तुत्य त्वं च पुण्यातिशयविरचितानीतिनीतिप्रवणो
अनन्तस्त्वं स्तोतुमन्तः स्मरति हृदि हरिं नाथितुं लोकनाथम्।।[3]

[1] को.म.सर्गः-21, श्लोकः-64-65

[2] तत्रैव.सर्गः-21,श्लो-60

अर्थात् हे प्रभो! अनन्तपुण्यस्य अधिकारीणां सौभाग्यशालीनां मर्त्यवासीनां नेत्राणि अद्य देवगणपरिवेष्टितं भवन्तं नन्दिघोषे विलोक्य पवित्राणि जातानि।
रथयात्रादर्शनार्थं न केवलं मनुष्याः अपि तु देवाः गन्धर्वाः किन्नराः इतरप्राणिनश्च आगच्छन्ति।

एनं सर्वसुपर्वनायकः इह श्रीनन्दघोषोत्सवम्
द्रष्टुं हृष्टमानाः सहस्रनयनैर्नान्योऽस्ति शक्तिः पुनः।
एनं स्तोतुमनन्त एव वदनैराकल्पमल्पं पुनः
श्रोतुं ध्वान्तमहर्निशं स भगवानाजीवितः शंकरः।।[4]

रथयात्रायां नन्दिघोष-तालध्वज-दर्पदलननाम्ना त्रयरथाः भवन्ति। एतेषु जगन्नाथःसुभद्रा बलरामः च आरूह्य गुण्डिचामन्दिरं गच्छन्ति।

भूदेवैर्भूरिदेवैः सकलनरवरैर्भ्रातरावद्य मध्ये
सार्द्धं बन्धुव्रजैरग्रजमनुहरितामीश्वरैः सत्वरं सः।
श्रुत्वा शेषः प्रभूतैः फणिभिरपि वृतोधर्त्तुमुर्वीं स गुर्वीम्
पर्यायं किं न कुर्यात्क्षणमनणुमितं तत्फणानां प्रमाणम्।।[5]
अग्रे स्थिताऽतिसुखदा दयितस्य मुक्तिम्
पश्चाद्गता वितनुते सुखितातिशास्त्रात्।
ज्ञातंमतं जगति पश्यति किं सुभद्रा
रम्यानमस्य हरतीह रतिं प्रयाति।।[6]

अनयोः श्लोकयोः बलरामसुभद्रयोः वर्णनम् अस्ति। यत् अग्रे वलरामस्य तालध्वजरथः मध्ये सुभद्रायाः दर्पदलनः अन्तिमे च स्वयं जगतः नाथः जगन्नाथस्य रथः नन्दिघोषः प्रचलति। काव्ये नन्दिघोषविषये कविः वर्णयति यत्-

यद्धूलीपटलैर्नभस्तलमलं गाढान्धकाराकुलम्
शीताशीतमयूखलोचनयुतं संमील्य चाहर्निशम्।
लेखा लेख्यपदं समीक्ष्य गगने प्राप्ताः परं स्यन्दनम्
धावं धावमपाममाप जनता भीताऽभृताशान्विता।।[7]

अर्थात् नन्दिघोषात् समुथतैः धूलिभिः गगनमण्डलम् अन्धकारत्वात् देवताः अपि आकाशे स्थित्वा सूर्यशशिरूपकचक्षुद्वयम् निर्मुलयन्ति। परन्तु त्रितापभीतजनाः तस्य पापहारीजगन्नाथस्य शरणं नित्वा अमृतलाभार्थं नन्दिघोषरथाभिमुखं धावन्ति।

तन्निघ्नन्नमरद्रुहासुरमहोनीतं पतङ्गप्रभम्
स्वायौजोन्तकृपीटयोनिनिवहे दर्पं पतङ्गास्पदम्।
मन्दैर्येन पयः पयोधिमथने पृथ्वीधरं मन्दरम्
मन्थानं कलयन् कलौ विजयते श्रीनन्दिघोषः स्वनैः।।[8]

यः रथः देवशत्रुणां दर्पं स्वओजरूपकवह्न्या पतङ्ग इव नाशयित्वा देवानां तेजांसि सूर्यरश्मि इव प्रभावशाली कर्त्तुं समर्थः। सः नन्दिघोषः यदा गर्जनपूर्वकं अग्रसरति तदा समुद्रमन्थनसमये मन्दरपर्वत इव प्रतिभाति।

धूतानन्तरजा रथाङ्गचलनैः प्रक्षोभि रक्षासहम्
व्योमालम्बितुमीहतेऽणुतनुभृत् स्वाध्यासितुं ढौकते।
किम्बोपेन्द्रकृतं समस्तचरितं विज्ञापयन्ती निजम्
श्रीगोविन्दशताङ्गमन्दगमने सा काश्यपं काश्यपी।।[9]

पुनश्च नन्दिघोषस्य मन्दगमनात् रथचक्रैः समुथिताः पांशवः यदा उद्गच्छन्ति तदानीम् धरणी स्वयं श्रीपतेः जगन्नाथस्य कुशलवृत्तान्तं जनयितुं परमाणुरूपं धृत्वा आदित्यलोकं गच्छति इति प्रतीर्तिभवति।

धूलीभिधुतकल्मषा सुजनता व्यक्ताधितापत्रयी
पाटीरैर्मरूता चयैः सुरभिभिर्दक् चक्रमामोदितम्।
पृथ्वी नेमिपदाद् विभाति नितरां सीमान्तिनी नीरजा
लोकः शोकमुपाजहात् त्रिजगतां नाथे रथाधिष्ठिते।।[10]

ताभिः धूलिभिः जनाः पापरहिताः भवन्ति। दिग्चक्रवालाः आमोदिताः भवन्ति। रजोहीनाधरणी निपततैः चक्रचिह्नैः सीमन्तशोभिनी भवति। चर्तुर्दशभुवनानि शोकरहितानि भवन्ति।

शताङ्गचरोणत्थितैर्मम रजोभरैरम्बरम्
भुवत्सलमिवापरं किमु कृतं न वा सागरम्ए।
स्थलीकृतमिति क्षणं न चलति क्षमा सागरो
हरीक्षणपरः क्षणं चलति नेति भूयः पुरः।।[11]

तैः समुथतैः पांशवैः नभमण्डलं भूमण्डलमिव शोभते। सागरश्च स्थलमिव परिशोभते। अतः क्षमासागरः हरिः क्षमासागरयोः संशयेन क्षणमात्रं अग्रसरति। पुनश्च क्षणमात्रं स्थगितो भवति।

समस्तजगतां रतिं विदधती मुनीनां मतिम्
विधाय जगदीश्वरे चलति मन्दमम्भोधरे।

[3] को.म.सर्ग-11,श्लो.1
[4] तत्रैव.श्लो.2
[5] तत्रैव.श्लो.4
[6] तत्रैव.श्लो.15
[7] तत्रैव.श्लो.6
[8] तत्रैव.श्लो.7
[9] तत्रैव.श्लोक.8
[10] तत्रैव.श्लो.9
[11] तत्रैव.श्लो.11

विभाति परितो दवीयसि दवीयसी सा भुव-
स्तलेऽम्बरतरङ्गिणी पथि शताङ्गजा पद्धतिः।।[12]

मुनीनां मनांसि सांसारिकविषयेभ्यः अवरूध्य यदा जगन्नाथः नन्दिघोषेन सह अग्रे गच्छति तदनु भूमौ पतितानि चक्रचिह्नानि आकाशगङ्गा इव परिशोभन्ते। नन्दिघोषस्य माहात्म्यं वर्णयन् कविः लिखति-

प्रमोदरससागरे नरहरेः शताङ्गश्चलन्
निमज्जयति सज्जनावनिमण्डलं मण्डयन्।
करोमि वद किम् नुतिं जडमतिर्विभो सम्प्रति
प्रतिक्षणमतिस्तुतिं सुरपतिस्तुनोति क्षितेः।।[13]

अर्थात् महीमण्डलस्य अलंकार इव भगवतः अयं नन्दिघोषरथः मन्दगत्या अग्रसरितो भूत्वा सज्जनानां मनांसि अनन्त स्नेहेन आनन्देन च निमज्जति। येन नन्दिघोषोत्सवेन भूमण्डलमिदं धन्यं जातं इति स्वयं सुरपतिइन्द्रः सर्वदा प्रशंसति। तस्य रथोत्सवस्य वर्णनं मत् सद्दशः जडबुद्धिः कथं वा समर्थो भवेत्?

अल्पोभवेत् विधिवलेन सतां विपत्तेः
कालोऽसत्तां जगति पश्यति तत्समृद्धेः।
शून्यत्वमत्र ननु सप्तदिनानि यस्मा
न्नीलाचले परगृहे परिपूर्णता च।।[14]

रथयात्रा सप्तदिनं यावत् प्रचलति। तस्मिन् समये सप्तदिनपर्यन्तं भगवतः जगन्नाथस्य निवासः श्रीमन्दिरं विहाय गुण्डिचामन्दिरं भवति। अस्मिन् रथोत्सवकाले नारदप्रभृतिनाम् अपि दुष्प्राप्यः भक्तवत्सलः भूवनाधिपतिः भगवानजगन्नाथः दर्शनाभिलाषीनां भक्तानां कृते आत्मदर्शनार्थं स्वयमेव मन्दिरात् वर्हि आगत्य श्रीमन्दिरात् गुण्डिचामन्दिरं प्रति गच्छति।
अस्मिन् अवसरे अनेकसांस्कृतिककार्यक्रमाः, नृत्यगीतादि परिवेषणानि, शास्त्रचर्चाः,अध्यात्म-चर्चाः, यज्ञादयश्च अस्य रथोत्सवस्य अधिकशोभां वर्धयन्ति। कविः काव्ये अनेकमनोरञ्जनकार्यक्रमाणां वर्णनं करोति। येन माध्यमेन आवालवृद्धवनिताः आनन्दम् अनुभवन्ति।

क्वचिन्मेनका मंजुला मंजुलास्या
सुहावापरा मंजुघोषा सुकेशा।
परानन्दमानन्दकन्दं मुकुन्दन्
समीयुः समं रम्भया प्रीणयन्त्या।।[15]

भगवतः एतं रथोत्सवं चारूतरकर्त्तुं स्वर्गात् नृत्यार्थं मेनका-रम्भा-मञ्जुला-मञ्जुघोषा-सुकेशाप्रभृतयः अप्सरसः समायान्ति।
अस्मिन् उत्सवे स्थाने स्थाने संगीतविद्यानिपुणभक्तानां संगोष्ठी-उपनिषद्-पातञ्जलयोगशास्त्र-आगम-स्मृतिशास्त्राणां चर्चाः भवन्ति। क्वचित् स्थाने पण्डिताः न्याय-वैशेषिक-मीमांसा-कर्मकाण्डादिविषये शास्त्रार्थं कुर्वन्ति। कुत्राचित् काव्यचर्चा भवति । कुत्राचित् हास्यरसेन जनान् सन्तोषयन्ति। अनेनप्रकारेण मनोरञ्जनसाधनानि। रथयात्रायाः शोभां वर्द्धयन्ति स्म।
रथयात्रायाः अन्तिमदिवसे यदा रथानां गुण्डिचामन्दिरात् प्रत्यावर्त्तनं भवन्ति। तथा च यदा जगन्नाथः मन्दिरं प्रविशति तदा मातालक्ष्मी कुपिताः रूष्टा च भूत्वा भगवतः मार्गम् अवरोधयति। तस्मिन् काले उभयोः वार्त्तालापं काव्ये सुन्दरतया वर्णितमस्ति।
जगन्नाथः बलभद्रसुभद्राभ्याम् सह अखिलभुवनवासीनां कृते दर्शनसुखं प्रदाय स्वयमपि आनन्दम् अनुभवति। तस्मिन् रथोत्सवकाले एतानि दिनानि सुभद्रायाः कृते क्षणवत् तथा च लक्ष्म्याः कृते कल्पसद्दशाः प्रतीयन्ते स्म। अतः लक्ष्मी जगन्नाथं प्रति रूष्टा भवति।
जगन्नाथः मातालक्ष्मीं प्रसन्नं कर्त्तुं तां वदति-

भवस्तव पयोनिधौ न हि च वाचि शैत्यं तनो-
र्दशोरिदमनार्जवं वचसि तन्नि मन्ये मुहुः।
इति प्रियवचः स्मितं विद्धती निपीयाहतम्
हरेर्नयनगोचरं जयति सम्पदे ते रमा।।[16]

अर्थात् हे तन्वी! सागरात् जन्मलाभत्वात् भवत्याः अङ्गेषु या शीतलता स्यात् सा भवत्याः वाण्यां न प्रकाशते। चक्षोः सरलता अपि भवत्याः वचने नास्ति। एतत् एव अहम् अनुभवामि। प्राणनाथस्य एतत् प्रीतिकरवचनं श्रुत्वा मातालक्ष्मी सहासवदने जगन्नाथस्य सम्मुखम् आगतवती। अनेन प्रकारेण भगवता लक्ष्मी प्रसन्ना कृता।
संसारे रथयात्रायाः नन्दिघोषश्च माहात्म्यवर्णनं कश्चिदपि वर्णयितुं न समर्थः। अतः कविना उक्तम्-

तं के वा वर्णयितुं प्रभव इव गिरां स्यन्दनं नन्दनेशो
ज्ञो न ज्ञातुं यतोऽलं सुरूचिररचितं यस्य चिन्ताश्रवोऽभूत्।
किं वा भव्यान्यकाव्यामृतसरिति जगत् क्षलितं कैः कवीन्द्रै-
र्नैतस्मिन् वाङ्गनो वा नयनमपि चरत्यन्यमार्गानु वृत्तिः।।[17]

[12] तत्रैव.श्लोक.12

[13] तत्रैव.श्लो.13

[14] तत्रैव.श्लो.14

[15] तत्रैव.श्लो.20

[16] तत्रैव.श्लो.37

[17] तत्रैव.श्लो.34

## सन्दर्भ


1. शुक्ला हिरालाल, कोसलानन्दकाव्यम् प्र.न्यु भारतीय बुक कार्पोरेशन,दिल्ली-110007
2. साहु यज्ञकुमारः,चोपदारःदेवानन्दः,कोशलानन्दकाव्यम्,इतिहासविभागः,सम्वलपुरविद्यालयः,ज्योतिविहारः, बुर्ला 768019.
3. करनिरञ्जनः, कोशलानन्दकाव्यम्, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,श्रीविहारः, पुरी 7520024, शतपथी हरेकृष्णः, संस्कृत साहित्य र इतिहास, किताव महल, तृतीयसंस्करण,1998